E-Text

पत्रस्य नाम	:	परिभाषेन्दुशेखरः (1-49 परिभाषाः)
पत्रसंख्या	:	IV
पाठ्यांशनाम	:	नानुबन्धकृतमनेकाल्त्वम्, नानुबन्धकृतमनेजन्तत्वम्, नानुबन्धकृतमसारूप्यम्
पाठ्यांशसंख्या	:	7

पाठ्यांशस्य मुख्याः अंशाः :

1) नानुबन्धकृतमनेकाल्त्वम्, परिभाषार्थः।
2) नानुबन्धकृतमनेजन्तत्वम्, परिभाषार्थः।
3) नानुबन्धकृतमारूप्यम्, परिभाषार्थः।
4) इमाः परिभाषाः भाष्योपारूढाः।

विषयसूची

आ) नानुबन्धकृतमनेजन्तत्वम्

1.0: अवतारिकाग्रन्थः तस्य विवरणं च

2.0: परिभाषार्थः

3.0: उदीचां माङ इत्यत्र माङ कृतात्वनिर्देशः ज्ञापकः

4.0: इयं परिभाषा भाष्योपारूढा

इ) नानुबन्धकृतमसारूप्यम्

1.0: अवतारिकाग्रन्थः तस्य विवरणं च

2.0: परिभाषार्थः

3.0: अत्र ददाति-दधात्योः... इत्यत्र विभाषाग्रहणं ज्ञापकम्

4.0: इयं परिभाषा भाष्योपारूढा

पाठ्यांशसंग्रहः

उपोद्घातः

परिभाषेन्दुशेखरे शताधिकं परिभाषाः व्याख्याताः नागेशभट्टेन। ताश्च परिभाषाः प्रकरणत्रये विभक्ताः तच्च प्रकरणत्रयम् (1) शास्त्रत्वसंपादकप्रकरणम् (2) बाधाबीजप्रकरणम् (3) शास्त्रशेषप्रकरणम् चेति। तत्र प्रथमप्रकरणे प्रथमपरिभाषया अ, इ, उ, ण्, लण् इति माहेश्वरसूत्रयोः द्वयोरपि एक एव ण-कारः किमर्थम् अनुबन्धः कृतः? इति विचार्य निरूपितम्। ततः परिभाषाद्वयेन विधिशास्त्रस्य संज्ञापरिभाषाभ्याम् उपकारविषये यथोद्देशपक्षः, कार्यकालपक्षः इति पक्षद्वयमस्ति। लक्ष्यानुसारेण तयोः एकस्य पक्षस्य स्वीकारः कर्तव्यः इति विचार्य निर्धारितम्।

इदानीं वृद्धि-तन्निषेधादिकार्यप्रवृत्तये प्रत्यय-आगम-आदेशेषु पाणिनिना ये अनुबन्धाः= इत्संज्ञकवर्णाः, कृताः ते येषु आयोजिताः ते, तेषाम् अवयवाः वा? नवा? इति विचारितं परिभाषाद्वयेन। ततः, सिद्धान्तपक्षे प्राप्तदोषवारणाय तिस्रः परिभाषाः व्याख्यायन्ते। आहत्य एतासां पञ्चानां परिभाषाणाम् अनुबन्धपञ्चकम् इति व्यवहारः अस्ति वैयाकरणसंप्रदाये। परन्तु एतत्परिभाषापञ्चकम् अनुबन्धविषये शास्त्रकाराणामाशयज्ञानायैव उपयुज्यते,नतु सूत्रार्थविशेषनिर्णये रूपविशेषनिर्णये वा इति मे मतिः।

तत्र अनुबन्धपञ्चके तृतीय-चतुर्थ-पञ्चमपरिभाषाः व्याख्यायन्ते क्रमेण।

अ) नानुबन्धकृतमनेकाल्त्वम्

1.0 अवतारिकाग्रन्थः तस्य विवरणं च

परिभाषेन्दुशेखरे नानुबन्धकृतमनेकाल्त्वम् इति परिभाषा एवम् अवतारिता - ननु **एकान्तत्वे** अनेकाल्त्वादेव औशादीनां सर्वादेशत्वसिद्ध्या

अनेकाल्......... 1.1.55 सूत्रे शिद्ग्रहणं व्यर्थम्। अतः आह - नानुबन्धकृतमनेकाल्त्वम् इति ग्रन्थेन।

तस्यायमाशयः - इतः प्राक् अनुबन्धाः अनेकान्ताः इति परिभाषाद्वारा अनुबन्धानाम् अनुबन्धिनः अनवयवत्वं निरूप्य ततः एकान्ताः (अनुबन्धाः) इति परिभाषया अनुबन्धानाम् एकान्तत्वम् = अवयवत्वं सिद्धान्तितम्।

इदानीं शङ्का भवति - अनुबन्धानां बोधकावयवत्वे, अष्टाभ्य औश् 7.1.21 इत्यादिसूत्रविहितानाम् औशादीनाम् (अष्टन् अस्) अष्टौ इत्यादौ अनेकाल् शित् सर्वस्य 1.1.55 इति सूत्रेण अनेकाल्त्वादेव सर्वादेशत्वसिद्धौ तत्र सूत्रे पृथक् शिद्-ग्रहणं व्यर्थम् इति शङ्का जायते। एतच्छङ्कासमाधानपरतया नानुबन्धकृतमनेकाल्त्वम् इति एषा परिभाषा स्वीकृता।

अयमत्र अभिप्रायः - यथा जराया जरसन्यतरस्याम् इत्यादौ जराशब्दस्य विधीयमानः जरस् आदेशः अनेकाल्त्वात् सर्वादेशो भवति तथैव (अष्टन् अस्) अष्टौ, (सर्व अस् ई) सर्वे, (इदम् दृश) ईदृशः इत्यादौ च अष्टाभ्य औश्, जशश्शी, इदंकिमोरिश्-की इत्यादि सूत्रैः क्रमेण विधीयमानाः औश् (औ) शी(ई) ईश्(ई) इत्यादयः अपि अनेकाल्त्वादेव सर्वादेशाः भवन्ति। तर्हि अनेकाल् शित् सर्वस्य इति सूत्रे अनेकाल् पदापेक्षया पृथक् कृतं शिद्ग्रहणं व्यर्थम्। एवं व्यर्थं सत् नानुबन्धकृतमनेकाल्त्वम् इति परिभाषां ज्ञापयति।

2.0 परिभाषार्थः

अनुबन्धेन कृतम् = अनुबन्धकृतम्, अनुबन्धप्रयुक्तम् इत्यर्थः। अनेके अलः यस्य सः अनेकाल्, तस्य भावः = अनेकाल्त्वम्, अनेकवर्णवत्त्वम् इत्यर्थः। तथा च अनुबन्धकृतम् अनेकाल्त्वम् अनेकाल्शित् सर्वस्य 1.1.55

इति सर्वादेशताप्रयोजकं न भवति। अनुबन्धविनिर्मुक्ते शब्दे यदि अनेकाल्त्वम् अस्ति, तदेव सर्वादेशताप्रयोजकम् इति परिभाषार्थः।

3.0 शिद्ग्रहणस्य चारितार्थ्यम्

अष्टाभ्य औश् 7.1.21 इत्यादिसूत्रविहितेषु औशादिषु अनुबन्धविनिर्मुक्ते शब्दे औ ई ई इत्यादिषु अनेकल्त्वाभावात् सर्वादेशतायाम् अप्राप्तायाम् तदर्थं कृतं शिद्ग्रहणं चरितार्थम्।

अन्यत्र पलम् - अन्यत्र पलं तु अर्वन्तौ अर्वन्तः इत्यादौ अर्वणस्त्रसावनञः 6.1.12 (नञा रहितस्य अर्वन्नान्तस्य अङ्गस्य तृ इत्यन्तादेशः स्यात् न तु सौ इति सूत्रस्य अर्थः।) इति सूत्रेण विहितस्य तृ इत्यादेशस्य सर्वादेशत्वाभावः।

4.0 डा-णलादिविषये शङ्का, समाधानं च

अत्र काचित् शङ्का जायते - भूधातोः लुटि तिपि कृते, भू ति इति स्थिते, लुटः प्रथमस्य डारौरसः 2.4.85 इति सूत्रेण तिपः सर्वस्य स्थाने डा(आ)आदेशे भू आ इति जाते, स्यतासी लृलुटोः इति सूत्रेण तास् प्रत्यये, आर्धधातुकस्येड्वलादेः इति सूत्रेण तस्य इडागमे **भू इतास् आ** इति जाते, धतोः गुणे ओकारे, तस्य अव् आदेशे **भवितास् आ** इति जाते डादेशे डित्वकरणसामर्थ्यात् तास् प्रत्यये आस् रूपस्य टेः लोपे भविता इति रूपं भवति इति स्थितिः।

एवं भूधातोः लिटि तिपि कृते भू ति इति स्थितौ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः 3.4.82 (लिटस्तिबादीनां नवानां णलादयोनव स्युः इति सूत्रस्य अर्थः।) इति सूत्रेण तिपः सर्वस्य स्थाने णल्(अ) आदेशे द्वित्वादिकार्येषु कृतेषु बभूव इति भवति इति च स्थितिः।

इदानीं शङ्का का? इत्युक्ते डा(आ) णल्(अ) इत्यनयोः अनेकाल्त्वम् अनुबन्धकृतमेव न तु स्वतः अनेकाल्त्वम् इति सर्वादेशता इष्टा न स्यात् इति।

अत्रेदं समाधानम् - डा(आ) णल्(अ) इत्येतौ स्वतः प्रत्ययौ न, प्रत्ययाधिकारे तयोः पाठाभावात्। यदा तिपः स्थाने आदेशतया प्रवर्तेते तदैव स्थानिवद्भावेन तयोः प्रत्ययत्वं सिध्यति। तदा एव प्रत्ययादित्वेन चु टू (1.3.7) इत्यादेः प्रवृत्त्या डादीनाम् अनुबन्धत्वं सिध्यति। अतः आदेशतया प्रवृत्तिकाले अनयोः प्रत्ययत्वाभावात् डादीनाम् अनुबन्धत्वाभावेन आनुपूर्व्यात्(श्रुतवर्णक्रमानुसारेण) अनेकाल्त्वेन अनेकाल्शित् सर्वस्य 1.1.55 इति सूत्रेण सर्वादेशता सिध्यति इति। ततः पश्चात् यद्यपि डादीनाम् अनुबन्धत्वं भवति, तथापि पश्चात् काले जातम् अनुबन्धत्वं पूर्वकाले जायमानं सर्वादेशत्वं न वारयितुं प्रभवति इति। इत्संज्ञावत्त्वम् अनुबन्धत्वम् इति मतम् आश्रित्य एवं समाधानम् उक्तम्।

5.0 प्रकारान्तरेण / मतान्तरेण समाधानम्

अत्र लघुशब्देन्दुशेखरकाराशयः अन्यथा अस्ति। तथाहि - कौमुद्याम् जसः शी 7.1.17 इति सूत्रव्याख्यावसरे दीक्षितेन उक्तम् - अदन्तात् सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। नच अर्वणस्तृ (अर्वणस्त्रसावनञः) इत्यादाविव नानुबन्धकृतमनेकाल्त्वम्(प.) इति (निषेधात् सर्वादेशत्वाभावः इति) वाच्यम्, सर्वादेशत्वात् प्राक् इत्संज्ञायाः एवाभावात् इति। एतद्ग्रन्थव्याख्याने शेखरकारेण उक्तम् - परे तु अनुबन्धत्वयोग्यतया अत्रापि (शी विषयेऽपि) तन्निषेधप्रवृत्त्या शित्त्वादेव सर्वादेशः। इत्संज्ञायोग्यशकारवत्त्वमेव तत्सूत्रे शित्त्वम्। अत एव क-अणोर्विषये नानुबन्ध-

कृतमसारूप्यमिति विकल्पाभावः। अन्यथा कादीनां कादेर्वाक्यार्थबोधोत्तरं प्रत्ययत्वज्ञाने इत्संज्ञादेः प्रवृत्त्या वाक्यार्थबोधरूपतत्प्रवृत्तिकाले अनुबन्धज्ञानाभावेन विकल्पो दुर्वारः। पश्चात् अनुबन्धत्वज्ञानेऽपि जातनि-वृत्त्ययोगात्। यदि तत्र पश्चात् तज्ज्ञाने तन्निवृत्तिः, तर्हि अत्रापि पश्चात् तज्ज्ञाने सर्वादेशत्वस्य अपि निवृत्त्यापत्तिः। ध्वनितं चेदं लुटः प्रथमस्य, अनेकाल् शिद् इत्यादिसूत्रेषु भाष्ये इति प्राहुः इति।

यदि एतं शेखरग्रन्थम् अनुसृत्य इत्संज्ञायोग्यत्वम् अनुबन्धत्वम्, न तु इत्संज्ञावत्त्वम् अनुबन्धत्वम् इति स्वीक्रियते तदा डादिविषये डा+आ=डा, ण+अल्=णल्, इति प्रश्लेषेण सर्वादेशत्वं संसाधनीयम्। अत्र मते **डादिविषये तु सर्वादेशत्वं विना अनुबन्धत्वस्यैव अभावेन आनुपूर्व्यात् सिद्धम्** इति मूल(परिभाषेन्दुशेखर) वाक्ये एवशब्दस्य अप्यर्थकत्वम् भिन्नक्रमता इत्यादि स्वीकृत्य एवमर्थो वर्णनीयः - अनुबन्धत्वस्य अभावेन विनापि, अर्थात्, इत्संज्ञायोग्यतया अनुबन्धत्वेन नानुबन्धकृतमनेकाल्त्वम् इति परिभाषाप्रवृत्तौ अपि प्रश्लेषेण डा+आ=डा, ण+अल्=णल्, इत्यानुपूर्व्यात् सर्वादेशत्वं सिद्धम् इति।

6.0 इयं परिभाषा भाष्योपारूढा

1. **अनेकाल्शित् सर्वस्य** 1-1-55 **इति सूत्रभाष्ये** उट्टङ्किता एषा।

तत्र भाष्यग्रन्थः एवमस्ति - अनेकाल्शित् सर्वस्य 1-1-55 इति सूत्रे भाष्ये उक्तम् - शित्सर्वस्येति शक्यमकर्तुम्। कथम्? अन्त्यस्यायं स्थाने भवन् औश् प्रभृतिः अप्रत्ययः स्यात्। असत्यां प्रत्ययसञ्ज्ञायाम् इत्संज्ञा न स्यात्। असत्यामित्संज्ञायां लोपो न स्यात्। असति लोपे अनेकाल्। यदा अनेकाल्,

तदा सर्वादेशः। यदा सर्वादेशः तदा प्रत्ययः। यदा प्रत्ययः तदा इत्संज्ञा तदा लोपः।

एवं तर्हि सिद्धे सति, यत् शित्सर्वस्य इत्याह तज्ज्ञापयत्याचार्यः भवत्येषा परिभाषा **नानुबन्धकृतमनेकाल्त्वं भवतीति**। किमेतस्य ज्ञापने प्रयोजनम्? तत्रासरूप-सर्वादेश-दाप्प्रतिषेधेषु पृथग् निर्देशोऽनाकारान्तत्वात् इत्युक्तं तन्न वक्तव्यं भवति इति।

2. एवं **तस्य लोपः इति सूत्रभाष्येऽपि उट्टङ्किता** एषा। तत्र उक्तम् - यद्यपि उक्तं सर्वादेशे दोषः इति। अत्रापि आचार्यप्रवृत्तिः ज्ञापयति - **नानुबन्धकृतम् अनेकाल्त्वं भवति** इति यदयम् अनेकाल् शित् सर्वस्य 1.1.55 इत्याह इति। एवम् इयम् परिभाषा भाष्योपारूढा इति स्पष्टम्।

एतदेवोक्तं मूले - ननु एकान्तत्वे अनेकाल्त्वादेव औशादीनां सर्वादेशत्वसिद्ध्या अनेकाल्... 1.1.55 सूत्रे शिद्ग्रहणं व्यर्थम्, अत आह - नानुबन्धकृतम् अनेकाल्त्वम्। शिद्ग्रहणम् एव एतज्- ज्ञापकम्। तेन अर्वणस्तृ...6.4.127 इत्यादेः न सर्वादेशत्वम्। **डादिविषये तु सर्वादेशत्वं विना अनुबन्धत्वस्यैव अभावेन आनुपूर्व्यात् सिद्धम्** इति।

आ) नानुबन्धकृतमनेजन्तत्वम्

1.0 अवतारिकाग्रन्थः तस्य विवरणं च

परिभाषेन्दुशेखरे नानुबन्धकृतमनेजन्तत्वम् इति परिभाषा एवम् अवतारिता — नन्वेवमपि 'अवदातं मुखम्' इत्यत्र पलोपोत्तरम् आत्वे कृते अदाप्...1.1.20 इति घुसंज्ञाप्रतिषेधो न स्यात्, दैपः पकारसत्वे **अनेजन्तत्वात्**

आत्वाप्राप्त्या, पलोपोत्तरं पकाराभावेन अस्य दास्वाभावात्। अतः आह - नानुबन्धकृतमनेजन्तत्वम् इति ग्रन्थेन।

तस्यायमाशयः - ननु अनुबन्धाः एकान्ताः इति स्वीकारे, अवदातं मुखम् इत्यादौ अवपूर्वकाद् दैप्-धातोः पलोपात् अनन्तरम् 'आदेच उपदेशेऽशिति' 6.1.45 इत्यात्वे कृते (पकाराभावेन) अदास्वाद् दाधाघ्वदाप् 1.1.20 इति सूत्रे अदाप् इति घुसंज्ञाप्रतिषेधः न स्यात्, दैपः पकारसत्त्वे अनेजन्तत्वेन आत्वाप्राप्तेः दैस्वेऽपि दास्वाभावात् अदाप् इति घुसंज्ञाप्रतिषेधः न स्यात्। पलोपोत्तरं च पकाराभावेन दास्वाभावात् इति शङ्का। तत्समाधानपरतया नानुबन्धकृतमनेजन्तत्वम् इति एषा परिभाषा स्वीकृता इति।

2.0 परिभाषार्थः

अनुबन्धेन कृतम् = अनुबन्धकृतम्, अनुबन्धप्रयुक्तम् इत्यर्थः। एच् अन्तः यस्य सः एजन्तः,न एजन्तः- अनेजन्तः, तस्य भावः अनेजन्तत्वम्। अनुबन्धकृतम् अनेजन्तत्वम् आदेच उपदेशेऽशिति 6.1.45 इत्यादिशास्त्रप्रवृत्ति प्रतिबन्धकं न भवति। अनुबन्धविनिर्मुक्ते शब्दे यदि अनेजन्तत्वम् अस्ति तदेव आदेच उपदेशेऽशिति 6.1.45 इति शास्त्रप्रवृत्तिप्रतिबन्धकं भवति इति परिभाषार्थः।

अनुबन्धहेतुकः एजन्तत्वाभावः अत्र शास्त्रे न स्वीक्रियते। तेन दैपः पकारः अत्र एजन्तत्वे बाधकः न भवति। तत्सत्वेऽपि दैपः एजन्तत्वात् आदेच... इत्यात्वे दास्वं सूपपन्नम्। अतः अदाप् इति घुसंज्ञानिषेधः भवत्येव इति तात्पर्यम्। इत्थं घुत्वाभावाद् 'अवदातं मुखम्' **इत्यत्र** दो दद्घोः 7.4.46 इति न दथादेशापत्तिदोषः।

3.0 उदीचां माङः इत्यत्र माङः इति कृतात्त्वनिर्देशः ज्ञापकः

अत्र ज्ञापकः उदीचां माङो व्यतिहारे 3.4.19 इत्यत्र मेङ् -प्रणिदाने इति धातोः माङः इति कृतात्त्वनिर्देशः। तथाहि - आदेच उपदेशेऽशिति 6.1.45 इति सूत्रेण उपदिश्यमानस्य एजन्तस्य धातोः आत्वं विधीयते। इह मेङ् धातौ ङकारसत्त्वे एजन्तत्वाभावात् आत्वाप्राप्तेः, निर्देशः असंगतः। माङः इति निर्देशः एवम् असंगतः सन् नानुबन्धकृतमनेजन्तत्वम् इति परिभाषां ज्ञापयति।

स्वांशे चारितार्थ्यम्

परिभाषास्वीकारे तु ङकारस्य अनुबन्धत्वात् तत्कृतस्य अनेजन्तत्वस्य आदेच उपदेशेऽशिति 6.1.45 इति शास्त्रप्रवृत्तिप्रतिबन्धकत्वस्य अस्वीकारात् एजन्तत्वेन, कृतात्वनिर्देशः संगतः एव।

न च उपदेशे एव अनुबन्धलोपः, ततः धातुसंज्ञा इति सिद्धान्तानुसारेण मेङ् इत्यवस्थायां धातुत्वाभावात् कथम् आत्वम् इति वाच्यम्, तत्र धातोः 6.1.8 इत्यस्य निवृत्त्यङ्गीकारात्।

अन्यत्र फलम्

अन्यत्र फलं तु 'अवदातं मुखम्' **इत्यत्र इत्संज्ञकपकारसत्त्वेपि एजन्तत्वमाश्रित्य आत्वप्रवृत्तिः, तेन अदाप् इति घुसंज्ञानिषेधः, ततः** दो दद्घोः 7.4.46 इति न दथादेशः इत्यादि इष्टसिद्धिः।

4.0 इयं परिभाषा भाष्योपारूढा

1. इयं परिभाषा दाधाघ्वदाप् इति सूत्रभाष्ये स्पष्टा। तथा हि— दाधाघ्वदाप् 1.1.20 इत्यत्र भाष्ये प्रोक्तं — दाप्प्रतिषेधे न दैपि अनेजन्तत्वात्।।19।। दाप्प्रतिषेधे दैपि प्रतिषेधो न प्राप्नोति। अवदातं मुखम्। ननु च आत्वे कृते भविष्यति। तद्धि आत्वं न प्राप्नोति। किं कारणम्? अनेजन्तत्वात्।

अथवा आचार्यप्रवृत्तिः ज्ञापयति - नानुबन्धकृतमनेजन्तत्वम् इति। यदयम् "उदीचां माङो व्यतीहारे 3.4.19 इति मेङः सानुबन्धकस्य आत्वभूतस्य ग्रहणं करोति।

2. एवं तस्य लोपः इति सूत्रभाष्येऽपि उट्टङ्किता एषा। तत्र एवमुक्तम्-- यद्यपि उक्तं दाप् - प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्यः इति, न कर्तव्यः आचार्य-प्रनृत्तिः ज्ञापयति - नानुबन्धकृतमनेजन्तत्वं भवति इति, यदयम् उदीचां माङो व्यतीहारे' (3.4.19) इति मेङः सानुबन्धकस्य आत्वभूतस्य ग्रहणं करोति इति। एवमस्याः परिभाषायाः भाष्योपारूढत्वं स्पष्टम्।

एतदेवोक्तं मूले - उदीचां माङः...3.4.19 इति निर्देशः अस्याः ज्ञापकः। आदेच उपदेशे...6.1.45 इति सूत्रेण उपदिश्यमानस्य एजन्तस्य आत्वं क्रियते, ङकारसत्त्वे एजन्तत्वाभावात् आत्वाप्राप्तेः तस्य असङ्गतिः। न च अस्याम् अवस्थायां तस्य धातुत्वाभावात् कथम् आत्वम्, तत्र धातोः (6.1.8) इत्यस्य निवृत्तेः इत्यन्यत्र विस्तरः। स्पष्टञ्चेदं "दाधा घ्वदाप्" (1.1.20) इति सूत्रे भाष्ये इति ग्रन्थेन।

इ) नानुबन्धकृतमसारूप्यम्

1.0 अवतारिकाग्रन्थः तस्य विवरणं च

परिभाषेन्दुशेखरे नानुबन्धकृतमसारूप्यम् इति परिभाषा एवम् अवतारिता - ननु एवमपि वासरूपोऽस्त्रियाम् 3.1.98 इति सूत्रेण कविषये अणोऽपि आपत्तिः। अतः आह - नानुबन्धकृतमासारूप्यम् - इति ग्रन्थेन।

तस्यायमाशयः - ननु अनुबन्धानाम् अवयवत्वस्वीकरे, अनुबन्धघटितस्यैव बोधकत्वेन क-अण् प्रत्यययोः असरूपत्वाद् वाऽसरूपोऽस्त्रियाम् 3.1.94 इति विकल्पेन बाधात् गोदः इत्यत्र कविषये पक्षे अणपि आपद्येत। अनवयवत्वे तु

न दोषः, तदा कस्य अणश्च उभयोः समानरूपत्वेन कप्रत्ययेन अणः नित्यबाधात्। तथाच एकान्तपक्षो दुष्ट इति शङ्का।तत्समाधानपरतया स्वीकृता एषा परिभाषा नानुबन्धकृतमसारूप्यम् इति।

2.0 परिभाषार्थः

अनुबन्धेन कृतम् = अनुबन्धकृतम्, अनुबन्धप्रयुक्तम् इत्यर्थः। समानं रूपं यस्य तत् सरूपम्, न सरूपम् - असरूपम्। तस्य भावः असारूप्यम्। अनुबन्धकृतम् असारूप्यम् = असरूपता, वाऽसरूपोऽस्त्रियाम् 3.1.94 इति शास्त्रप्रवृत्तिप्रयोजकं न भवति। अनुबन्धविनिर्मुक्ते शब्दे यदि असारूप्यम् अस्ति तदेव वाऽसरूपोऽस्त्रियाम् 3.1.94 इति शास्त्रप्रवृत्तिप्रयोजकं भवति इति परिभाषार्थः।

प्रकृते क-अण् प्रत्यययोः अनुबन्धकृतमेव असारूप्यम्, नतु अनुबन्धेतरकृतम्। अतः अत्र विकल्पेन बाधकत्वं न भवति, किन्तु नित्यबाधकत्वमेव।

3.0 अत्र ददाति-दधात्योः..... इति सूत्रे विभाषाग्रहणं ज्ञापकम्

अत्र ज्ञापकं ददाति-दधात्योः विभाषा 3.1.139 इत्यत्र णप्रत्ययबाधकस्य शप्रत्ययस्य विकल्पेन विधानम्।

अत्र ददाति-दधात्योः आकारान्तधातुत्वेन श्याद्व्यधास्रुसंस्व्रतीणवसा-वहृलिहश्लिषश्वसश्च 3.1.141 इति सूत्रेण णप्रत्ययः सामान्यतया विहितः। एतं विकल्पतया बाधित्वा पक्षे शप्रत्ययसिद्धये ददाति-दधात्योः विभाषा इति सूत्रे विभाषा ग्रहणं कृतम् इति स्थितिः।

किंतु अत्र ण-शप्रत्यययोः असारूप्यात् वाऽसरूपोऽस्त्रियाम् 3.1.94 इति सूत्रेण स्वतः एव विकल्पेन बाधे सिद्धे, तयोः विकल्पसिद्धये कृतं विभाषाग्रहणं व्यर्थम्।

एवं व्यर्थं सत् नानुबन्धकृतमसारूप्यम् इति परिभाषां ज्ञापयति।

स्वांशे चारितार्थ्यम्

ज्ञापितायां परिभाषायां, ण-शप्रत्यययोः अनुबन्धकृतमेव असारूप्यम् इति, तत्र वाऽसरूपोऽस्त्रियाम् 3.1.94 इत्यस्य अप्रवृत्तौ तयोः विकल्पसिद्धये ददाति-दधात्योः विभाषा 3.1.139 इत्यत्र कृतं विभाषाग्रहणं चरितर्थम्।

अन्यत्र फलम्

अन्यत्र फलं तु - गोदः इत्यादौ आतोऽनुपसर्गे कः 3.1.3 इति कप्रत्ययेन कर्मण्यण् 3.2.1 इति अणो नित्यं बाधसिद्धिः।

4.0 इयं परिभाषा भाष्योपारूढा

1. वाऽसरूपोऽस्त्रियाम् 3.2.94 इति सूत्रे भाष्ये परिभाषेयम् उपलभ्यते। तथा हि - अथ एकान्ते दोषः एव? एकान्ते च न दोषः। आचार्यप्रवृत्तिः ज्ञापयति नानुबन्धकृतमसारूप्यं भवति इति, यत् अयं ददाति-दधात्योः विभाषा शं शास्ति इति।

2. एवं तस्य लोपः इति सूत्रभाष्येऽपि उट्टङ्किता एषा। तत्र एवमुक्तम् - ननु च उक्तं तत्र असरूप-सर्वादेश-दाप्प्रतिषेधे पृथक्त्वनिर्देशः अनाकारान्तत्वात् इति। असरूपविधौ तावत् न दोषः। आचार्यप्रवृत्तिः ज्ञापयति - नानुबन्धकृतम् असारूप्यं भवति इति। यदयं ददातिदधात्योः विभाषा (3.1.139) इति विभाषा शं शास्ति इति ग्रन्थेन।

एवमस्याः परिभाषायाः भाष्योपारूढत्वं स्पष्टम्।

एतदेव उक्तं मूले –

ददातिदधात्योः विभाषा इति णबाधक-शस्य विकल्पविधायकम् अस्याः ज्ञापकम्। तेन गोदः इत्यादौ न अण् इति वाऽसरूपोऽस्त्रियाम् 3.1.94 इति सूत्रभाष्ये स्पष्टम् - इति ग्रन्थेन।

पाठ्यांशसंग्रहः

अस्मिन् पाठे नानुबन्धकृतम् अनेकाल्त्वम् इति परिभाषाविषये –

1. अवतारिकाग्रन्थस्य विवरणम्, 2. परिभाषार्थः, 3. शिद्ग्रहणस्य चारितार्थ्यम्, 4. डा-णलादिविषये शङ्का समाधानम्, 5. तत्रैव मतान्तरेण समाधानम्, 6. इयं परिभाषा भाष्योपारूढा इत्येते विषयाः ज्ञाताः।

नानुबन्धकृतम् अनेजन्तत्वम् इति परिभाषाविषये च - 1. अवतारिका ग्रन्थस्य विवरणम्, 2. परिभाषार्थः, 3. अस्यां परिभाषायाम् उदीचां माङ इत्यत्र माङ इति कृतात्वनिर्देशः ज्ञापकः, 4. इयं परिभाषा भाष्योपारूढा इत्येते विषयाः ज्ञाताः।

नानुबन्धकृतमसारूप्यम् इति परिभाषाविषये च - 1. अवतारिकाग्रन्थस्य विवरणम्, 2. परिभाषार्थः, 3. अत्र ददाति-दधात्योः... इत्यत्र विभाषाग्रहणं ज्ञापकम्, 4. इयं परिभाषा भाष्योपारूढा इत्येते विषयाः ज्ञाताः।

एतत्परिभाषासम्बन्धिनः अन्ये विषयाः व्याख्यानान्तरेभ्यः ज्ञेयाः।